International Journal of Sanskrit Research 2017; 3(4): 279-282

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(4): 279-282
© 2017
www.anantaajournal.com
Received: 22-05-2017
Accepted: 24-06-2017

**Nepal Das**
Ph.D. Student of Rastriya Sanskrit Vidyapeetha, Tirupati
Dept of Advaitavedanta, Tirupati, Andhra Pradesh, India

**Correspondence**
**Nepal Das**
Ph.D. student of Rastriya Sanskrit Vidyapeetha, Tirupati
Dept of Advaitavedanta, Tirupati, Andhra Pradesh, India

# ब्रह्मसूत्रे अविरोधाध्यायस्य प्रथमपादे प्रस्थानत्रयसमन्वयः

**Nepal Das**

प्रस्तावना

बादरायणविरोचितं ब्रह्मसूत्रं बहुजनप्रथितम्। चतुर्ष्वध्यायेषु प्रथमेऽध्याये प्रथमे पादे चतुःसूत्र्यां ब्रह्मणो विचार्यत्वं लक्षणं, वेदवेद्यत्वं, वेदकर्तृत्वं वेदान्तसमन्वितत्वञ्च श्रुतिस्मृत्यनुकूलतया एव विचारितमिति शाङ्करभाष्ये विनिश्चितम्, इरतेष्वपि प्रथमाध्यायान्तरभूतसूत्रेषु सर्वेषामेव वेदान्तानां ब्रह्मण्येव समन्वयो यथा संस्थापितस्तथैव मीमांसित इति प्रदर्शितं अद्वैतदर्शने।

सांख्यादयस्तु निर्गुणस्य कूटस्थस्य ब्रह्मणः कारणत्वमनुकृत्य जगत्कारणत्व-प्रदर्शनकारीनि वेदान्तवाक्यानि प्रधानकारणपक्षे योजयन्ति। प्रधानपुरुषसंयोगाः नित्यानुमेया इति मन्यमानाः सांख्या त्रिगुणात्मकक्रियाशक्तिसम्पन्नस्य प्रधानस्य वेदान्तवाक्येषु अचेतनस्यैव प्रधानस्य सतः सर्वज्ञत्वमुपचर्यते इति उत्तिष्ठन्ते। तन्मतञ्चागमविरुद्धमिति द्योतयितुमेव ब्रह्मसूत्रे प्रथमेऽध्याये प्रथमे पादे ईक्षत्याधिकरणे सांख्य-पातञ्जलसम्मतस्य प्रधानस्य जगत्कारणत्वं निराक्रियते। तथा हि अद्वैतमतानुकूल्येन सूत्रान् व्याचिक्षासुभिः शङ्कराचार्यैर्भाणितम् - "तत्र पदवाक्यप्रमाणज्ञाचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्ते" [1] इति। "ईक्षतेर्नाशब्दम्"[2] इति सूत्रभाष्ये सांख्यसम्मतप्रधानकारणवादस्याशब्दत्वेनानादरणीयत्वं सदात्मनश्च जगत्कारणत्वं सूत्रविवक्षितम् इति प्रदर्शयितुं ब्रह्मणो जगत्कारणत्वे श्रुतिप्रमाणमुदाहृतं शङ्कराचार्यैः "सदेव सोम्य इदमग्र आसीदेवमेवाद्वितीयम्" [3] इति उपक्रम्य "तदैक्षत बहु स्यां प्रजायेय" इति, "तत् तेजोऽसृजत" [4] इति। सच्छब्दवाच्यात्मचैतन्यस्यैव नित्यस्य ईक्षणपूर्वकं स्त्रष्टृत्वं प्रदर्शितमागमे। तदुक्तं छान्दोग्यश्रुतिभाष्ये शङ्कराचार्यैः "तत् सत् ऐक्षत ईक्षां दर्शनं कृतवान्। अतश्च न प्रधानं सांख्यपरिकल्पितं जगत्कारणम्, प्रधानस्याचेतनत्वाभ्युपगमात्। इदन्तु सत् चेतनम् ईक्षितृत्वात्"[5] इति।

अचेतनस्य प्रधानस्य गुणसाम्यात् तथा च साक्षित्वासम्भवात् सर्वज्ञविशेषणं नोपयुज्येत इति प्रधानस्य साक्षिनिमित्तेक्षितृत्वकल्पनाया लाघवान् सर्वज्ञं मुख्यं ब्रह्म जागत्कारणमिति एव सर्वथा सङ्गच्छत इति प्रतिष्ठापितं सूत्रभाष्ये शङ्कराचार्यैः। न दोषः स्यादिति प्रतिपादयितुं तत्र सूत्रभाष्ये उक्तं तत्र भवता इति।

> मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
> हेतुनानेन कौन्तेय जगद् विपरिवर्तते।।[6]

इति गीताश्लोकभाष्येऽपि भगवता शङ्कराचार्येण अनावरणज्ञानस्योदासीनस्यापि चेश्वरस्य साक्षित्वमात्रं निमित्तीकृत्य जगतः सर्वा प्रवृत्तिरहितमिदं भोक्षे, पश्यामीदं श्रृणोमि, इदं सुखमनुभवामि दुःखमनुभवामि तदर्थमिदं करिष्यामि

---

[1] ब्रह्मसूत्रशङ्करभाष्यम् 1/1/5
[2] ब्रह्मसूत्रम् 1/1/5
[3] छान्दोग्योपनिषद् 6/2/1
[4] छान्दोग्योपनिषद् 6/2/3
[5] छान्दोग्योपनिषच्छाङ्करभाष्यम् 6/2/3
[6] गीताशङ्करभाष्यम् 6/10

एतदर्थमिदं किरिष्ये इत्याद्या अवगतिनिष्ठा अवगत्यवसानैव। "यो अयाध्यक्षः परमे व्योमन्" इत्यादयश्च मन्त्रा एतदर्थं दर्शयन्ति" इति। अतश्चैतन्यपुरःसर एव लोकव्यवहारः, न हि अचेतनस्य कस्यचित् पुरतः स्वतन्तन्त्रतया जगत्कारणं भवितुमर्हति इति स्मृतेरभिप्रायः श्रुत्यनुकूलतया प्रतिपादितः शङ्कराचार्यैः।

"ननु तत् तेज ऐक्षत" "ता आप ऐक्षन्त" [7] इति यथा अचेतनयोरप्तेजसयोश्चेतनवदुपचारो दृश्यते तथा सच्छब्दवाच्ये अचेतनेऽपि औपचारिकमेव ईक्षणं स्यादिति चेत्तदाशङ्कां निराकर्तुमेव सूत्रप्रवृत्तिः "गौणश्चेन्नात्मशब्दात्" [8] आचार्याणामभिमतम्। आत्मैव चैतन्यस्वरूपः सच्छब्दवाच्य इति सूत्रार्थं व्याकर्तुं श्रुतिरुद्धृता शङ्कराचार्यैः "सा इदं देवता ऐक्षत...नामरूपेव्याकर्वाणि"[9] इति। न खलु चेतनो जीवोऽचेतनस्य आत्मा स्वरूपं भवितुमर्हतीति सांख्यपरिकल्पितगौणेक्षितृत्वनिराकरणाय सूत्रभाष्ये आत्मनमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो"[10] इत्यत्र "स आत्मा" इति प्रकृतं सदण्मानमात्मानमात्मशब्देनोपदिश्य "तत्त्वमसि श्वेतकोतो" इति चेतनस्य च प्रयोज्यत्वेनैव निर्देशात्" इति।

ननु कथं पुनः सुखदुःखादि संबद्धे संसारिजीवेऽसंसारिण्याः सर्वज्ञायाः देवताया अनुप्रवेशः स्यात् येन तस्य जीवविषये आत्मशब्दप्रयोग उपपद्येत इति उपाधिसंसर्गजनितं स्वचिदाभासाविविक्तस्वरूपत्वं जीवस्य निरूप्य औपाधिकदोषसंसर्गमात्मनि निराकरोति भगावान् शङ्करः छान्दोग्यश्रुतिभाष्ये "जीवो हि नाम देवताया आभासमात्रं बुद्ध्यादिभूतमात्रसंसर्गजनितः आदर्शे इति प्रविष्टः पुरुषप्रतिबिम्बः, जलादिष्विव च सूर्यादीनाम् ...तदवत् देवतामिपि"[11] इति। अतश्च परमार्थतः न ईश्वरात् अन्यः संसारी जीवः इति अद्वैतवादसम्मतं जीवेश्वरयोरन्यत्वं यथा प्रतिबिम्बदृष्टान्तेन उपपादितश्चान्दोग्यश्रुतिभाष्ये तथा उपाधिसम्बन्धमाश्रित्य व्याख्यातः "ईक्षतेर्नाशब्दम्" इति सूत्रभाष्येऽपि - "सत्यं, न ईश्वरात् अन्यः संसारी। तथापि देहादिसंघातोपाधिसम्बन्ध इष्यत एव, घटकरकगिरिगुहाद्युपधिसम्बन्ध इव व्योम्नः। तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टः। तत्कृता चाकाशे घटाकाशादिभेदमिथ्यावुद्धिर्दृष्टा। तथा इहापि देहादिसंघातोपाधिसम्बन्धा-विवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते च आत्मन एव सतो देहिसंघातेऽनात्मनि आत्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण पूर्वपूर्वेण" इति।

"ममैवांशो जीवलोके जीवभूतः सनातनः"[12] इति गीताश्लोकभाष्येऽपि अद्वैतदृष्ट्या निरवयवस्य परमात्मनः अंशभूतो जीवः कथं सङ्गच्छत तत् प्रतिपादितं शङ्कराचार्यैः "नैषः दोषः अविद्याकृतोपाधिपरिच्छिन्न एकदेशोंऽश इव कल्पितो यतः" इति। एवञ्च चैतन्यस्वरूपयोर्जीवात्मनोरनन्यत्वप्रतिपादनविषये श्रुतिस्मृतिसूत्रभाष्येषु शङ्कराद्वैत-दर्शनसमन्वयः विस्पष्टमुपलभ्यते।

न च सदणिमनि आत्मशब्दस्य गौणत्वमिति सूचयितुमेव सूत्रारभ्यते - "तन्निष्ठस्य मोक्षोपदेशात्"[13] इति तथाहि सदण्मानमेव प्रकृत्य "तत्त्वमसि श्वेतकेतोः"[14] इति चेतनस्य श्वेतकेतोस्तन्निष्टामुपदिश्य " आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पतस्ये"[15] इति मोक्ष उपदिश्यते। अचेतनं प्रधानं चेत् चेतनस्य मुमुक्षोः सत आत्मत्वेन उपदिशेत् शास्त्रं तथात्वे पुरुषार्थविपरीतवादित्वेन शास्त्रस्याप्रामाण्यं प्रसज्येत। तन्न समीचीनं स्यात्। अमुख्ये च सदात्मतत्त्वोपदेशे "अहममुकथस्ति इति विद्यात्"[16] इतिवत् आत्मज्ञानस्य सम्पदुपासनस्येवानित्फत्वमापद्येत। तप्तपरशुग्रहणमोक्षदृष्टान्तेन सत्याभिसन्धस्य मोक्षोपदेशेन मोक्षोपदेशेन[17] यथाभूतमेव आत्मानम् उपदिशति छान्दोग्यश्रुतिः "सः आत्मा तत्त्वमसि श्वेतकेतोः" इति सच्छब्दवाच्य आत्मैवेति सूत्रभाष्ये प्रितपादितं शङ्कराचार्यैः

सदणिमानि आत्मशब्दस्य मुख्यत्वं युक्त्या प्रतिष्ठितं शङ्कराचार्यैः छान्दोग्योपनिषदि अपि - "ननु पराक्रमादिगुणः सिंहोऽसि त्वम्, इतिवत् तत्त्वमसीति स्यात्। न, मृदादिवत् सदेकमेवाद्वितीयम्, सत्यमित्युपदेशात्। न च प्रचारविज्ञानात् "तस्य तावदेव चिरम्" इति सत्सम्पत्तिरूपदिश्येत, मृषात्वादुपचारविज्ञानस्य त्वमिन्द्रो यम इतिवत्"[18] इति।

"स आत्मा तत्त्वमसि" इत्यत्र यदि अचेतनं प्रधानमुपदिष्टं स्यात् तथात्वे अनात्मज्ञतया तन्निष्ठो मा भूत् इति मुख्यमात्मानमुपदिदिक्षु शास्त्रं तस्य हेयत्वं ब्रूयात्, न तु तथा ब्रूते, छान्दोग्ये षष्ठप्रपाठके परिसमाप्तिपर्यन्तमेवात्मागावेव तात्पर्यं दृश्यते, अतः प्रददानं न सच्छब्दवाच्यम्। अतो "हेयत्वावचनाच्च"[19] इति प्रधाननिराकरणे एव सूत्रस्य तात्पर्यं मन्यते आचार्यपादैः शङ्कराचार्यैः।

"स्वाप्ययात्", "गतिसामान्यात्", "श्रुतत्वाच्च"[20] इत्येषु सूत्रेष्वपि चेतनस्य ब्रह्मणो जगत्कारणत्वे हेतुं प्रदर्श्य प्रधानस्य जगत्कारणत्वं निराक्रियत इति प्रतिपादकानि समर्थानि श्रुतिवाक्यानि तत्र तत्र सूत्रभाष्ये उद्धृतानि शङ्कराचार्यैः "यत्र एतत् पुरुषः, स्वपिति नाम, सता सोम्य तदा सम्पन्नो भवति, स्वम् अपीतो भवति, तस्मात् एनं स्वपीतित्याचक्षते स्वं हि अपीतो भवति"[21]। श्रुतेस्तात्पर्यं व्याकृत्य च भणति सूत्रभाष्ये " न च चेतनमात्मा अचेदनं प्रधानं स्वरूपत्वेन प्रतिपद्येत"[22] इति। चेतनो जीवः सुषुप्तौ सत्स्वरूपेणात्मनैव सम्पन्नो भवति इति श्रुतेराशयं सदृष्टान्तम् उपपादयति पुनश्छान्दग्यश्रुतिभाष्ये "न ह्यन्यत्र सुषुप्तात् स्वमपीति जीवस्येच्छन्ति ब्रह्मविदः। तत्र ह्यादर्शापनयने पुरुषप्रतिबिम्ब"[23] इत्यादिरूपेण।

समाना एव सर्वेषु वेदान्तेषु चेतकारणावगतिरित्यत्र श्रुतिप्रमाणानि यथा शङ्कराचार्यैरुद्धृतानि सूत्रभाष्ये -"यथाग्नेर्ज्वलतः सर्वा दिशः विस्फुलिङ्गानि विप्रतिष्ठेरन् एवमेवैतास्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवेभ्यो लोकाः"[24] इति। तस्माद्वा एतस्माद् आत्मनः आकाशः सम्भूतः[25] इति। "आत्मत इदं सर्वम्"[26] इति। आत्मनः "एषः प्राणः जायते"[27] इति। एषु श्रुतिवाक्येषु द्व्यर्थहीनतया आत्मन एव जगत्कारणत्वं प्रदर्शितमिति जगतश्चेतकारणत्वे वेदान्तवाक्यानां गतिसामान्यश्रवणात् चेतनस्य आत्मनः एव जगत्कारणत्वं विचार्यते सूत्रभाष्ये इति वेदान्तवाक्यान्युदाहृत्य प्रतिपाद्यते शङ्कराचार्यैः।

---

[7] छान्दोग्योपनिषद् 6/2/3,4

[8] ब्रह्मसूत्रम् 1/2/6

[9] छान्दोग्योपनिषद् 6/3/2

[10] छान्दोग्योपनिषद् 6/8/7

[11] छान्दोग्योपनिषच्छाङ्करभाष्यम् 6/3/2

[12]गीता 15/7

[13] ब्रह्मसूत्रम् 1/1/7

[14] छान्दोग्योपनिषद् 6/13/3

[15] छान्दोग्योपनिषद् 6/14/2

[16] ऐतरेयारण्यकम् 2/1/16

[17] छान्दोग्योपनिषद् 6/16/1,2

[18]छान्दोग्योपनिषच्छाङ्करभाष्यम् 6/16/3

[19] ब्रह्मसूत्रम् 1/1/8

[20] ब्रह्मसूत्राणि 1/1//9-11

[21] छान्दोग्योपनिषच्छाङ्करभाष्यम् 6/8/2

[22] ब्रह्मसूत्रशाङ्कभाष्यम् 1/1/9

[23] छान्दोग्योपनिषच्छाङ्करभाष्यम् 6/8/1

[24] कौषीतक्युपनिषद् 3/3

[25] तैत्तिरीयोपनिषद् 2/1

[26] छान्दोग्योपनिषद् 7/16/1

[27] प्रश्नोपनिषद् 3/3

श्वेताश्वेतरोपनिषदि च सर्वज्ञमीश्वरं प्रकृत्य "स कारणं करणाधिपाधिपः। न चास्य कश्चिज्जनिता न चाधिपः [28] इति स्वशब्देन तस्यैव जगत्कारणत्वमाम्मनायते इति सूत्रभाष्ये[29] श्रुतिमुद्धृत्य चेतनकारणत्ववादः प्रतिष्ठापयति भगवान् शङ्करः -

गीताभाष्येऽपि श्रुत्यर्थसमन्विततया –

"मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।।[30]

इति गीताश्लोकार्थं प्रपञ्चयति भगवान् शङ्करः - "न हि निरात्मकं किञ्चिद्भवति" इति।

एवञ्च सूत्रश्रुतिस्मृतिसमन्वयात् सर्वज्ञमात्मचैतन्यमेव जगत्कारणं, नाचेतनं प्रधानमिति प्रस्थानभाष्ये अवैकल्पेन प्रतिपादितं शङ्कराचार्यैः।

आनन्दमयाधिकरणभाष्ये तैत्तिरीये आनन्दमयजीवाधारस्य परस्य ब्रह्मणः एव उपदेशः, न तु "ब्रह्म पुच्छं प्रतिष्ठा"[31] इत्यवयवशब्दयोगात् अमख्यात्मन आनन्दमयस्य इति परमेव ब्रह्म सूत्रप्रतिपाद्यमिति स्वमतं प्रतिष्ठापयति शङ्कराचार्यः। शङ्कराचार्यैः - "सद्योमुक्तिकारणमपि आत्मज्ञानमुपाधिविशेषद्वारेण उपदिश्यमानमपि अविविक्षितो-पाधिसम्बन्धविशेषं परापरविषयत्वेन सन्दिह्यमानं वाक्यगतिपर्यालोचनया निर्णेतव्यं भवति। यथा इहैव तावत् "आनन्दमयोऽभ्यासात्"[32] इति।

तैत्तिरीयके अन्नमयं प्राणमयं विज्ञानमयं चानुक्रम्याम्नायते" तस्माद्वा एतस्माद् विज्ञानमयाद् अन्योन्यर आत्मा आनन्दमय" [33] इति। तत्र वृत्तिकाराभिमतस्यानन्दयस्य ब्रह्मत्वं निराकृत्य "ब्रह्म पुच्छं प्रतिष्ठा" [34] इत्यानन्दमयं प्रकृत्य यत् ब्रह्म श्रुतं तदेव स्वप्रधानं ब्रह्म तैत्तिरीयके "उपदिश्यत अभ्यासात्" इति सूत्रनिर्गलितार्थं प्रतिष्ठापयन्ति शङ्कराचार्याः। स्वप्रधानं ब्रह्म कथंतैत्तिरीयेऽभ्यस्यते तदपि श्रुतिवचनान्युद्धृत्य दर्शयति सूत्रभाष्ये तत्रभगवान् शङ्कराचार्यः। तन्मते तैत्तिरीयके "सत्यं ज्ञानमनन्तं ब्रह्म"[35] इति ब्रह्म प्रकृत्य आनन्दमयकोशकल्पने "ब्रह्म पुच्छं प्रतिष्ठा इत्युच्यते। अथ "असन्नेव स भवति" [36] इति निगमनश्लेके ब्रह्मैव केवलमभ्यस्यते। अतः सूत्रभाष्ये आनन्दमयस्य ब्रह्मत्वं निराकृत्य उच्यते भगवत्पादैः - "यद्यपि आन्नमयादिभ्यः प्रमोद् उत्तरपक्षः आनन्द् आत्मा, ब्रह्मपुच्छं प्रतिष्ठा"[37] इति। तत्र यद् ब्रह्म मन्त्रवर्णे प्रकृतं "सत्यं ज्ञानमनन्तं ब्रह्म" इति तद् इह "ब्रह्म पुच्छं प्रतिष्ठा" इत्युच्यते। तद्विजिज्ञापयिषया एवान्नमयादय आनन्दमयपर्यन्ताः पञ्चकोशाः कल्प्यन्ते" इति।

तदुक्तं तैत्तिरीयश्रुतिभाष्येऽपि शङ्कराचार्यैः - "तद् यदन्दः करणं तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वमापद्यते यावत् यावत्तावद्विविक्ते प्रसन्नेन्तःकरणे आनन्दविशेष उत्कृष्यते विपुलीभवति। एवञ्चोत्कृष्यमाणस्यानन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्मपरमेव यत् प्रकृतं सत्यज्ञानानन्तलक्षणं, यस्य च प्रतिपत्त्यर्थं पञ्चान्नादिमयाः कोशा उपन्यस्ताः यच्च तेभ्य अभ्यन्तरं, येन ते सर्व आत्मवन्तः, तद्ब्रह्म पुच्छं प्रतिष्ठा। आनन्दमयस्यैकत्वावसानत्वात्। अस्ति तदेकमविद्याकल्पितस्य द्वैदस्यावसानभूतम् अद्वैतं ब्रह्म प्रतिष्ठा पुच्छम्"[38] इति।

श्रुतिभाष्यञ्चेदं शङ्कराचार्याणामद्वैतब्रह्मप्रतिष्ठापकं गीताश्लोकभाष्येणापि च सूतरां सङ्गच्छते तथा च गीताश्लोकः –

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्[39]।।

तत्र भाष्ये प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमं निरतिशयमुपैति उपगच्छति। ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वमित्येवं निश्चयवन्तं ब्रह्मभूतमकल्मषमधर्मादिवर्जितम्।" इत्येवं रूपेण विशुद्धानन्दसामान्यर्थे एव ब्रह्मशब्दं विनिश्चिनोति आचार्यपादः श्रुतिसूत्रार्थसमन्विततया। उक्तञ्च तत्रभवद्भिः तैत्तिरीयकश्रुतिभाष्ये - "आनन्द इति सुखसामान्यमात्मा प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वात् । आनन्द इति परं ब्रह्म"[40] इति।

इदमत्र लक्षणीयं यत् सूत्रभाष्ये वृत्तिकारसम्मते आनन्दमयस्य ब्रह्मत्वप्रितिपादनपरत्वे या युक्तिः प्रथमतः प्रदर्शिता सा एव युक्तिः श्रुतिभाष्ये शङ्कराचार्यैरपि प्रदर्शिता प्रत्यगात्मन एव मुख्यात्मत्वप्रतिपादनावसरे।

तत्र सूत्रभाष्ये उक्तम् "मुख्यमेव हि आत्मनमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरन् अन्नमयं शरीरमनात्मानमत्यन्तमुढानामात्मत्वेन प्रसिद्धमनुद्य, ततोऽन्तरं ततोऽन्तरमिति एवं पूर्वेण पूर्वेण समानमुत्तरमुत्तरमनात्मानम् आत्मा इति ग्राहयत्, प्रतिपत्तिसौकर्यापेक्षया सर्वान्तरं मुख्यमानन्दमयमात्मानमुपदिदेश इत श्लिष्टतरम्। यथा अरुन्धतीनिदर्शने वह्वीषु अपि तारासु अमुख्यासु आरुन्धतीषु दर्शितेषु, या अन्त्या प्रदश्र्यते, सा मुख्या एव अरुन्धती भवति।[41]

श्रुतिभाष्ये च "स हि पुरु, इह विद्यया आन्तरतमं ब्रह्म सङ्क्रामयितुमिष्टः तस्य च बाह्याकारविशयेष्वनात्मस्वात्मभाविता बुद्धिरनालम्ब्य विशेषं कञ्चित् सहसा आनन्तरतमप्रत्यगात्मविषया निरालम्बना च कर्त्तुमशक्येति दृष्टशरीरात्मसामान्यकल्पनया शाखाचन्द्रनिदर्शनवदन्तः प्रवेशयन्नाह – तस्येदमेव शिरः तस्यास्य पुरुषस्यान्नरसमयस्येदमेव शिरः प्रसिद्धम्। एतत् प्रकृत्योत्तरेषां प्राणमयादीनां रूपकत्वसिद्धिः मुषानिषिक्तद्रुतताम्रप्रतिभावत्[42] इति। अ. तावद्विशेषः वृत्तिकारमते आनन्दमयो जीव एव मुख्यब्रह्मत्वेन ग्रीह्यते, आनन्दशब्दस्य ब्रह्मण्यभ्यासात्। शङ्करमते तु आनन्दमयाधारः प्रत्यगात्मा कार्यजीवस्य कारणं परंब्रह्म एवानन्दस्वरूपं मुख्यात्मत्वेन आनन्दमयाधिरणे प्रतिपाद्यम्। तथा हि वृत्तिकारमते दोषं प्रदर्श्य उच्यते तत्रभवता विकारार्थे मयट्-प्रवाहे सति, आनन्दमये एवाकस्मात् अर्द्धजरतीन्यायेन कथमिव मयटः प्राचुर्यार्थत्वं ब्रह्मविषत्वञ्चाश्रीयते[43] इति। अथ चानन्दस्यैव ब्रह्मत्वं प्रतिपादयितुं युक्तिरुपन्यस्यते शङ्कराचार्यैः सूत्रभाष्ये द्वितीये वर्णके "या तु भार्गवी वारुणी विद्या आनन्दो ब्रह्म इति व्यजानात्" [44] इति तस्यां मयड्श्रवणात्, प्रियशिरसत्वाप्द्यश्रवणाच्च युक्तमानन्दस्य ब्रह्मत्वम्। तस्मादणुमात्रमपि विशेषम् अनाश्रित्य न स्वत एव प्रियशिरस्त्वादि ब्रह्मणः उपपद्यते। न चेह सविशेषं ब्रह्म

[28] श्वेताश्वेतरोपनिषद् 6/9
[29] ब्रह्मसूत्रम् 1/1/11
[30] गीता 9/4
[31] तैत्त्तिरीयोपनिषद् 2/5/2
[32] ब्रह्मसूत्रशाङ्करभाष्यम्1/2/6
[33] तैत्त्तिरीयोपनिषद् 1/5/2
[34] तैत्त्तिरीयोपनिषद् 1/5/2
[35] तैत्त्तिरीयोपनिषद् 2/1/2
[36] तैत्त्तिरीयोपनिषद् 1/6/1
[37] तैत्त्तिरीयोपनिषद्1/5/1

[38] तैत्त्तिरीयोपनिषच्छङ्करभाष्यम् 2/5
[39] गीता 6/27
[40] तैत्त्तिरीयोपनिषच्छङ्करभाष्यम्1/5
[41] ब्रह्मसूत्रशाङ्करभाष्यम् 1/1/12
[42] तैत्त्तिरीयोपनिषच्छङ्करभाष्यम्2/1
[43] ब्रह्मसूत्रशाङ्करभाष्यम् 1/1/6
[44] तैत्त्तिरीयोपनिषद् 3/6

प्रतिपिपायिषितं, वाङ्मनसगोचरातिक्रमश्रुतेः। तस्मादन्नमयादिषु इवानन्दमयेऽपि विकारार्थे एव मयट् विज्ञेयः, न प्राचुर्यार्थः" इति। "विकारशब्दान्नेति चेन्न प्राचुर्यात्"[45] इति सूत्रमपि च तत्र भवता स्वमतानुकूल्येन वाक्यगतिं स्वविशेषं पर्यालोच्य व्याख्यातम् - "प्राचुर्यं प्रायापत्तिः, अवयवप्राये वचनमित्यर्थः। अन्नमयादानां हि शिरादिषु पुच्छान्नेष्ववयवेषूक्तेष्वान्दमयस्यापि शिरादीनि अवयवान्तराण्युक्तवावयवप्रायापत्त्या" ब्रह्म पुच्छं प्रतिष्ठा" इत्याह, नावयवविवक्षा"।

श्रुतिभाष्येऽपि शङ्कराचार्यैः आप्राणमयात् मयड्त्ययस्य प्रायार्थो गृहीतः - "प्राणमयः, प्राणो वायुस्तन्मयस्तत्प्रायः"[46] इति। आनन्दमयशब्देन कार्यात्मा जीवन्मुक्तः एव वोध्य इत्यपि स्पष्टतः प्रोक्तं शङ्कराचार्यैः श्रुतिभाष्ये - "अन्नादिमया हि कार्यात्मनो भौतिका इहाधिकृताः। तदाधिकरणपतितश्चायमान्नदमयः। मयट् चात्र विकारार्थे दृष्टो यथान्नयः इत्यत्र। तस्मात् कार्यात्मा आनन्दमयः प्रत्येतव्य"[47] उपाधिकविशेषाद्वेति।

अतश्चानन्दमयशब्देनोपाधिविशेषद्वारेणोपदिश्यमानमपि "ब्रह्मविदाप्नोति परम्" [48] "ब्रह्म पुच्छं प्रतिष्ठा" [49] इति श्रुतिप्रमाणवलेन आन्दमयस्य प्रतिष्ठारूपत्वेन जीवन्मुक्तस्य प्रत्यगात्मा निरुपाधिकं ब्रह्मैव मुख्यात्मत्वेनानन्दमयाधिकरणे ब्रह्मसूत्रे प्रतिपाद्यते इति शङ्काभिप्रेतम्। तदुक्तं श्रुतिभाष्ये तत्र भवता - "पृष्टं प्रतिष्ठा कारणत्वात्। कारणं हि कार्यस्य प्रतिष्ठा"[50] इति। आन्दमयस्य प्रतिष्ठा दयानन्दः ब्रह्म। अतश्च ब्रह्मसूत्रे आनन्दमयाधिकरणे आनन्दमयोऽभ्यासात् इति सूत्रे "सत्यं जानम्" इति प्रकृतं परं ब्रह्म उच्यते इति सम्यक् युज्यते शङ्कराभिमतम्।

कारणानन्यत्वोपलब्धावेव निरतिशयसुखरूपं परं ब्रह्म आप्नोति ब्रह्मविद् इति शङ्कराद्वैतदर्शनं यथा श्रुतिभाष्ये यथा श्रुतिभाष्ये स्फुटीभवति तथा स्मृतिभाष्येऽपि। तथा च गीताश्लोकः –

"ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य।।[51]

व्याख्यातञ्च स्मृतेरभिप्रायो भाष्ये शङ्कराचार्यैः "ब्रह्मणः परमात्मनो हि यस्मात् प्रतिष्ठा अहं प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठाहं प्रत्यगात्मा। कीदृशस्य ब्रह्मणोऽ-मृतस्यावाशिनोऽव्ययस्याविकारिणः शाश्वतस्य च नित्यस्य धर्मस्य ज्ञानयोगधर्मप्राप्यस्य सुखस्यानन्दरूपस्यैकान्तिकस्याव्याभिचारिणः। अमृतादिस्वभावस्य परमात्मनः प्रत्यगात्मा प्रतिष्ठा सम्यग्ज्ञानेन प्रमात्मतया निश्चीयते। अथवा ब्रह्मशब्दवाच्यत्वात् सविकल्पकं ब्रह्म तस्य ब्रह्मणो निर्विकप्कोऽहमेव नान्यः प्रतिष्ठा आश्रयः" इति।

अत "आनन्दमय" इति उपाधिविशेषद्वारेण उपदिश्यमानमपि सद्योमुक्तिकारणं निरूपाधिकम् ऐकान्तिकानन्दरूपं ब्रह्म एवानन्दमयाधिकरणप्रतिपाद्यमिति वाक्यगतिप्रयालोचनया श्रुतिस्मृतितसमन्वितया मतिवैशद्यस्य परां काष्ठां प्रदर्श्य भगवता निर्णीतम् इत्यत्र न काचिद्विप्रतिपत्तिः स्यात्।

[45] ब्रह्मसूत्रम् 1/1/13
[46] तैत्त्तिरीयभाष्यम् 1/2
[47] तैत्त्तिरीयोपनिषच्छङ्करभाष्यम्2/5
[48] तैत्त्तिरीयोपनिषद् 2/1
[49] तैत्त्तिरीयोपनिषद् 2/1
[50] तैत्त्तिरीयोपनिषच्छङ्करभाष्यम् 2/4
[51] गीता 14/27

**ग्रन्थसूचि**


1. एम्.वि. सुब्रह्मण्यशास्त्री (सं.). (2010). सिद्धान्तसिन्धुः. तिरूपतिः: राष्ट्रियसंस्कृतविद्यापिठम्.
2. जगदीशशास्त्री (सं.). (1984). उपनिषत् संग्रहः,. देहली: मोतीलालवेनासीदाशः.
3. दीनेशशास्त्री. (1970). पञ्चदशी. वाराणसी: चौखाम्बा प्रकाशन्.
4. वि. पालः. (2011). वेदान्तसारः. कोलकाता: संस्कृतपुस्तकभाण्डारः.
5. विवरणाचार्यः. (1985). पञ्चपादिका (संस्क. प्रथमः). तिरुपतिः: राष्ट्रियसंस्कृतविद्यापिठम्.
6. व्यानार्जी दीपकदास. (1990). छान्दोग्योपनिषद्. कोलकाता: देशप्रकाशन्.
7. शङ्कराचार्यः. (2000). ब्रह्मसूत्रशाङ्करभाष्यम्(परिमलो कल्पतरु भामती टिका सहित). (श्रीमदनन्तकृष्णशास्त्रिः, सं.) वाराणसी: कृष्णदास अकादमी.